# 3 – अथ तृतीय दशकम्
## ॥ भक्तस्वरूप वर्णनम् - भक्ति प्रार्थना ॥

पठन्तो नामानि प्रमदभरसिंधौ निपतिताः
स्मरन्तो रूपं ते वरद कथयन्तो गुणकथाः ।
चरन्तो ये भक्तास्त्वयि खलु रमन्ते परममून्
अहं धन्यान् मन्ये समधिगतसर्वाभिलषितान् ॥ (3.1)

गदक्लिष्टं कष्टं तव चरणसेवारसभरेऽ-
प्यनासक्तं चित्तं भवति बत विष्णो! कुरु दयाम् ।
भवत्पादाम्भोजस्मरणरसिको नामनिवहान्
अहं गायं गायं कुहचन विवत्स्यामि विजने ॥ (3.2)

कृपा ते जाता चेत् किमिव न हि लभ्यं तनुभृतां
मदीयक्लेशौघप्रशमनदशा नाम कियती ।
न के के लोकेऽस्मिन्ननिशमयि शोकाभिरहिता
भवद्भक्ता मुक्ताः सुखगतिमसक्ता विदधते ॥ (3.3)

मुनिप्रौढा रूढा जगति खलु गूढात्मगतयो
भवत्पादाम्भोजस्मरणविरुजो नारदमुखाः ।
चरन्तीश! स्वैरं सततपरिनिर्भातपरचित्
सदानंदाद्वैतप्रसरपरिमग्नाः किमपरम् ॥ (3.4)

भवद्भक्तिः स्फीता भवतु मम सैव प्रशमयेत्
अशेषक्लेशौघं न खलु हृदि संदेहकणिका ।
न चेद्व्यासस्योक्तिस्तव च वचनं नैगमवचो
भवेन्मिथ्या रथ्यापुरुषवचनप्रायमखिलम् ॥ (3.5)

भवद्भक्तिस्तावत् प्रमुखमधुरा त्वद्गुणरसात्
किमप्यारूढा चेदखिलपरितापप्रशमनी ।
पुनश्चान्ते स्वान्ते विमलपरिबोधोदयमिलन्-
महानंदाद्वैतं दिशति किमतः प्राथ्यर्मपरम् ॥ (3.6)

विधूय क्लेशान् मे कुरु चरणयुग्मं धृतरसं
भवत् क्षेत्रप्राप्तौ करमपि च ते पूजनविधौ ।
भवन्मूर्त्या लोके नयनमथ ते पादतुलसी-
परिघ्राणे घ्राणं श्रवणमपि ते चारुचरिते ॥ (3.7)

प्रभूताधिव्याधिप्रसभचलिते मामकहृदि
त्वदीयं तद्रूपं परमरसचिद्रूपमुदियात् ।
उदंचद्रोमांचो गलितबहुहर्षाश्रुनिवहो
यथा विस्मर्यासं दुरुपशमपीडापरिभवान् ॥ (3.8)

मरुद्गेहाधीश! त्वयि खलु परांचोऽपि सुखिनो
भवत् स्नेही सोऽहं सुबहु परितप्ये च किमिदम् ।
अकीर्तिस्ते माऽभूद्वरद! गदभारं प्रशमयन्
भवद्भक्तोत्तंसं झटिति कुरु मां कंसदमन! ॥ (3.9)

किमुक्तैर्भूयोभिस्तव हि करुणा यावदुदियात्
अहं तावद्देव! प्रहितविविधार्तप्रलपितः ।
पुरः क्लृप्तेॊ पादे वरद! तव नेष्यामि दिवसान्
यथाशक्ति व्यक्तं नतिनुतिनिषेवा विरचयन् ॥ (3.10)

॥ इति भक्तिस्वरूपवर्णनम् - भक्ति प्रार्थना
तृतीय दशकम् संपूर्णम्॥

**प्रथमस्कंध परिच्छेदः संपूर्णम्**